

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## तृतीयकाण्डे द्वितीयः प्रश्नः

### पवमानग्रहादीनां व्याख्यानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यो वै। वै पवमानानाम्। पवमानाना,मन्वारोहान्। अन्वारोहान्विद्वान्। अन्वारोहानि-
त्यनु—आरोहान्। विद्वान्यजते। यजतेऽनु। अनु पवमानान्। पवमानाना। आ रोहति। रोहति
न। न पवमानेभ्यः। पवमानेभ्योऽव। अवच्छिद्यते। छिद्यते श्येनः। श्येनोऽसि। असि गाय-
त्रछन्दाः। गायत्रछन्दा अनु। गायत्रछन्दा इति गायत्र—छन्दाः। अनु त्वा। त्वा। आ रभे। रभे
स्वस्ति। स्वस्ति मा। मा सम्। सम् पारय। पारय सुपर्णः। सुपर्णो ऽसि। सुपर्ण इति सु—
पर्णः। असि त्रिष्टुप्छन्दाः। त्रिष्टुप्छन्दा अनु। त्रिष्टुप्छन्दा इति त्रिष्टुप्—छन्दाः। अनु त्वा। त्वा।
आ रभे। रभे स्वस्ति। स्वस्ति मा। मा सम्। सम् पारय। पारय सघा। सघाऽसि। असि जगती-
छन्दाः। जगतीछन्दा अनु। जगतीछन्दा इति जगती—छन्दाः। अनु त्वा। त्वा। आ रभे। रभे
स्वस्ति। स्वस्ति मा। मा सम्। सम् पारय। पारयेति। इत्याह। आहैते। एते वै। ॥ [१] ॥
वै पवमनानाम्। पवमानाना,मन्वारोहाः। अन्वारोहास्तान्। अन्वारोहा इत्यनु—आरोहाः।
तान्यः। य एवम्। एवँविद्वान्। विद्वान्यजते। यजतेऽनु। अनु पवमानान्। पवमानाना। आ
रोहति। रोहति न। न पवमानेभ्यः। पवमानेभ्योऽव। अवच्छिद्यते। छिद्यते यः। यो वै। वै
पवमानस्य। पवमानस्य सन्ततिम्। सन्ततिँवेद। सन्ततिमिति सम्—ततिम्। वेद सर्वम्।
सर्वमायुः। आयुरिति। एति न। न पुरा। पुरा ऽऽयुषः। आयुषः प्र। प्र मीयते। मीयते पशुमान्।
पशुमान्भवति। पशुमानिति पशु—मान्। भवति विन्दते। विन्दते प्रजाम्। प्रजाम् पवमानस्य।

प्रजामिति प्र—जाम्। पवमानस्य ग्रहाः। ग्रहा गृह्यन्ते। गृह्यन्ते ऽथ। अथ वै। वा अस्य। अस्यैते। एते ऽगृहीताः। अगृहीता द्रोणकलशः। द्रोणकलश आधवनीयः। द्रोणकलश इति द्रोण—कलशः। आधवनीयः पूतभृत्। आधवनीय इत्या—धवनीयः। पूतभृत् तान्। पूतभृदिति पूत—भृत्। तान्यत्। यदगृहीत्वा। अगृहीत्वोपाकुर्यात्। उपाकुर्यात्,पवमानम्। उपाकुर्यादि-त्युप—आकुर्यात्। पवमानँव्वि। वि च्छिन्द्यात्। ॥ [२] ॥ छिन्द्यात् तम्। तँव्विच्छिद्यमानम्। विच्छिद्यमानमद्ध्वर्योः। विच्छिद्यमानमिति वि—छिद्यमानम्। अद्ध्वर्योः प्राणः। प्राणोऽनु। प्राण इति प्र—अनः। अनु वि। वि च्छिद्येत। छिद्येतोपयामगृहीतः। उपयामगृहीतोऽसि। उप-यामगृहीत इत्युपयाम—गृहीतः। असि प्रजापतये। प्रजापतये त्वा। प्रजापतय इति प्रजा—पतये। त्वेति। इति द्रोणकलशम्। द्रोणकलशमभि। द्रोणकलशमिति द्रोण—कलशम्। अभि मृशेत्। मृशेदिन्द्राय। इन्द्राय त्वा। त्वेति। इत्याधवनीयम्। आधवनीयँव्विश्वेभ्यः। आधव-नीयमित्या—धवनीयम्। विश्वेभ्यस्त्वा। त्वा देवेभ्यः। देवेभ्य इति। इति पूतभृतम्। पूतभृतम् पवमानम्। पूतभृतमिति पूत—भृतम्। पवमानमेव। एव तत्। तथ् सम्। सम् तनोति। तनोति सर्वम्। सर्वमायुः। आयुरेति। एति न। न पुरा। पुरा ऽऽयुषः। आयुषः प्र। प्र मीयते। मीयते पशुमान्। पशुमान् भवति। पशुमानिति पशु—मान्। भवति विन्दते। विन्दते प्रजाम्। प्रजा-मिति प्र—जाम्॥ ॥ [३] ॥

(एते वि द्विचत्वारिꣳशच्च) ॥ १ ॥

---

त्रीणि वाव। वाव सवनानि। सवनान्यथ। अथ तृतीयम्। तृतीयꣳ सवनम्। सवनमव। अव लुम्पन्ति। लुम्पन्त्यनꣳशु। अनꣳशु कुर्वन्तः। कुर्वन्त उपाꣳशुम्। उपाꣳशुꣳ हुत्वा। उपाꣳ-शुमित्युप—अꣳशुम्। हुत्वोपाꣳशुपात्रे। उपाꣳशुपात्रे ऽꣳशुम्। उपाꣳशुपात्र इत्युपाꣳशु—पात्रे। अꣳशुमवास्य। अवास्य तम्। अवास्येत्यव—अस्य। तम् तृतीयसवने। तृतीयसव-नेऽपिसृज्य। तृतीयसवन इति तृतीय—सवने। अपिसृज्याभि। अपिसृज्येत्यपि—सृज्य। अभि षुणुयात्। सुनुयाद् यत्। यदाप्याययति। आप्याययति तेन। आप्याययतीत्या—प्याययति। तेनाꣳशुमत्। अꣳशुमद् यत्। अꣳशुमदित्यꣳशु—मत्। यदभिषुणोति। अभिषुणोति तेन।

अ॒भि॒षु॒णोतीत्य॑भि—सु॒नोति॑। तेन॑र्जी॒षि। ऋ॒जी॒षि सर्वा॑णि। सर्वा᳚ण्ये॒व। ए॒व तत्। तथ् सव॑नानि।
सव॑नान्यꣳशु॒मन्ति॑। अ॒ꣳ॒शु॒मन्ति॑ शु॒क्रव॑न्ति। अ॒ꣳ॒शु॒मन्तीत्यꣳ॑शु—मन्ति॑। शु॒क्रव॑न्ति स॒मा-
व॑द्वीर्या॑णि। शु॒क॒व॒न्तीति॑ शु॒क्र—व॒न्ति॒। स॒माव॑द्वीर्या॑णि करोति। स॒माव॑द्वीर्या॒णीति॑ स॒माव॑त्—
वी॒र्या॒णि॒। क॒रो॒ति॒ द्वौ। द्वौ स॑मु॒द्रौ। स॒मु॒द्रौ वित॑तौ। वित॑ताव॒जूर्यौ॑। वित॑ता॒विति॒ वि—त॒तौ॒।
अ॒जू॒र्यौ॑ प॒र्याव॑र्तेते। प॒र्याव॑र्तेते ज॒ठरा᳚। प॒र्याव॑र्ते॒ते इति॑ परि—आव॑र्तेते। ज॒ठरे॑व। इ॒व पादा᳚ः।
पादा॒ इति॒ पादा᳚ः॥ तयो॒ः पश्य॑न्तः। पश्य॑न्तो॒ अति॑। अति॑ यन्ति। य॒न्त्य॒न्यम्। अ॒न्यमप॑-
श्यन्तः। अप॑श्यन्त॒ः सेतु॑ना। ॥ [४] ॥ सेतु॒नाऽति॑। अति॑ यन्ति। य॒न्त्य॒न्यम्। अ॒न्यमि-
त्य॒न्यम्॥ द्वे द्रध॑सी। द्वे इति॒ द्वे। द्रध॑सी स॒तती᳚। द्रध॑सी॒ इति॒ द्रध॑सी। स॒तती॑ वस्ते। स॒त॒ती॒
इति॑ स—तती᳚। व॒स्त॒ एक॑ः। एक॑ः के॒शी। के॒शी विश्वा᳚। विश्वा॒ भुव॑नानि। भुव॑नानि वि॒द्वान्।
वि॒द्वानिति॑ वि॒द्वान्॥ ति॒रो॒धायै॑ति। ति॒रो॒धायेति॑ तिरः—धाय॑। ए॒त्यसि॑तम्। असि॑त॒व्ँवसा॑नः।
वसा॑नः शु॒क्रम्। शु॒क्रमा। आ द॑त्ते। द॒त्ते॒ अ॒नु॒हाय॑। अ॒नु॒हाय॑ जा॒र्यै॑। अ॒नु॒हायेत्य॑नु—हाय॑।
जा॒र्या॑ इति॑ जा॒र्यै॑॥ दे॒वा वै। वै यत्। यद् य॒ज्ञे। य॒ज्ञेऽकु॑र्वत। अकु॑र्वत॒ तत्। तदसु॑राः। असु॑रा
अकुर्वत। अ॒कु॒र्व॒त ते। ते दे॒वाः। दे॒वा ए॒तम्। ए॒तम् म॑हाय॒ज्ञम्। म॒हा॒य॒ज्ञम॑पश्यन्न्। म॒हा॒-
य॒ज्ञमिति॑ महा—य॒ज्ञम्। अ॒प॒श्य॒न् तम्। तम॑तन्वत। अ॒त॒न्व॒ता॒ग्नि॒हो॒त्रम्। अ॒ग्नि॒हो॒त्रव्ँ॒व्र॒तम्।
अ॒ग्नि॒हो॒त्रमित्य॑ग्नि—हो॒त्रम्। व्र॒तम॑कुर्वत। अ॒कु॒र्व॒त तस्मा᳚त्। तस्मा॒द् द्विव्र॑तः। द्विव्र॑तः स्यात्।
द्विव्र॑त॒ इति॒ द्वि—व्र॒तः॒। स्या॒द् द्विः। द्विर॒हि। ह्य॑ग्निहो॒त्रम्। अ॒ग्नि॒हो॒त्रम् जुह्व॑ति। अ॒ग्नि॒हो॒त्रमि-
त्य॑ग्नि—हो॒त्रम्। जुह्व॑ति पौर्णमा॒सम्। पौ॒र्ण॒मा॒सय्ँ य॒ज्ञम्। पौ॒र्ण॒मा॒समिति॑ पौर्ण—मा॒सम्। य॒ज्ञम॑-
ग्नीषो॒मीय᳚म्। अ॒ग्नी॒षो॒मीय॑म् प॒शुम्। अ॒ग्नी॒षो॒मी॒यमित्य॑ग्नी—सो॒मीय᳚म्। ॥ [५] ॥ प॒शुम॑कु-
र्वत। अ॒कु॒र्व॒त दा॒र्श्यम्। दा॒र्श्यय्ँ य॒ज्ञम्। य॒ज्ञमा᳚ग्ने॒यम्। आ॒ग्ने॒यम् प॒शुम्। प॒शुम॑कुर्वत। अ॒कु॒र्व॒त॒
वै॒श्व॒दे॒वम्। वै॒श्व॒दे॒वम् प्रा॑तस्सव॒नम्। वै॒श्व॒दे॒वमिति॑ वैश्व—दे॒वम्। प्रा॒त॒स्स॒व॒नम॑कुर्वत। प्रा॒त॒स्स॒-
व॒नमिति॑ प्रातः—स॒व॒नम्। अ॒कु॒र्व॒त॒ व॒रु॒ण॒प्र॒घा॒सान्। व॒रु॒ण॒प्र॒घा॒सान्,माद्ध्य॑न्दिनम्। व॒रु॒ण॒प्र॒-
घा॒सानिति॑ वरुण—प्र॒घा॒सान्। माद्ध्य॑न्दि॒न॒ꣳ॒ सव॑नम्। सव॑नꣳ साकमे॒धान्। सा॒क॒मे॒धान् पि॑तृ-
य॒ज्ञम्। सा॒क॒मे॒धानिति॑ साक—मे॒धान्। पि॒तृ॒य॒ज्ञम् त्र्य॑म्बकान्। पि॒तृ॒य॒ज्ञमिति॑ पितृ—य॒ज्ञम्।
त्र्य॑म्बकाꣳ तृतीयसव॒नम्। त्र्य॑म्बका॒निति॒ त्रि—अ॒म्ब॒का॒न्। तृ॒ती॒य॒स॒व॒नम॑कुर्वत। तृ॒ती॒य॒स॒व॒न-

मिति तृतीय—सवनम्। अकुर्वत तम्। तमेषाम्। एषामसुराः। असुरा यज्ञम्। यज्ञमन्ववा-जिगाꣳसन्न्। अन्ववाजिगाꣳसन् तम्। अन्ववाजिगाꣳसन्नित्यनु—अवाजिगाꣳसन्न्। तम् न। नान्ववायन्न्। अन्ववायन् ते। अन्ववायन्नित्यनु—अवायन्न्। तेऽब्रुवन्न्। अब्रुवन्नद्ध्वर्तव्याः। अद्ध्वर्तव्या वै। वा इमे। इमे देवाः। देवा अभूवन्न्। अभूवन्निति। इति तत्। तदद्ध्वरस्य। अद्ध्वरस्याद्ध्वरत्वम्। अद्ध्वरत्वम् ततः। अद्ध्वरत्वमित्यद्ध्वर—त्वम्। ततो देवाः। देवा अभवन्न्। अभवन् परा। परा ऽसुराः। असुरा यः। य एवम्। एवंविद्वान्। विद्वान्थ् सोमेन। सोमेन यजते। यजते भवति। भवत्यात्मना। आत्मना परा। परा ऽस्य। अस्य भ्रातृव्यः। भ्रातृव्यो भवति। भवतीति भवति॥ ॥ [६] ॥

(अपश्यन्तोऽग्नीषोमीयमात्मना परा त्रीणि च) ॥ २ ॥

परिभूरग्निम्। परिभूरिति परि—भूः। अग्निम् परिभूः। परिभूरिन्द्रम्। परिभूरिति परि—भूः। इन्द्रम् परिभूः। परिभूर् विश्वान्। परिभूरिति परि—भूः। विश्वान् देवान्। देवान् परिभूः। परिभूर् माम्। परिभूरिति परि—भूः। माꣳ सह। सह ब्रह्मवर्चसेन। ब्रह्मवर्चसेन सः। ब्रह्मवर्चसेनेति ब्रह्म—वर्चसेन। स नः। नः पवस्व। पवस्व शम्। शम् गवे। गवे शम्। शम् जनाय। जनाय शम्। शमर्वते। अर्वते शम्। शꣳ राजन्न्। राजन्नोषधीभ्यः। ओषधीभ्यो ऽच्छिन्नस्य। ओष-धीभ्य इत्योषधि—भ्यः। अच्छिन्नस्य ते। ते रयिपते। रयिपते सुवीर्यस्य। रयिपत इति रयि—पते। सुवीर्यस्य रायः। सुवीर्यस्येति सु—वीर्यस्य। रायस्पोषस्य। पोषस्य ददितारः। ददि-तारः स्याम। स्यामेति स्याम॥ तस्य मे। मे रास्व। रास्व तस्य। तस्य ते। ते भक्षीय। भक्षीय तस्य। तस्य ते। त इदम्। इदमुत्। उन् मृजे। मृज इति मृजे॥ प्राणाय मे। प्राणा-येति प्र—अनाय। मे वर्चोदाः। वर्चोदा वर्चसे। वर्चोदा इति वर्चः—दाः। वर्चसे पवस्व। पव-स्वापानाय। अपानाय व्यानाय। अपानायेत्यप—अनाय। व्यानाय वाचे। व्यानायेति वि—अनाय। वाचे दक्षक्रतुभ्याम्। ॥ [७] ॥ दक्षक्रतुभ्याम् चक्षुर्भ्याम्। दक्षक्रतुभ्यामिति दक्षक्रतु—भ्याम्। चक्षुर्भ्याम् मे। चक्षुर्भ्यामिति चक्षुः—भ्याम्। मे वर्चोदौ। वर्चोदौ वर्चसे। वर्चोदाविति वर्चः—दौ। वर्चसे पवेथाम्। पवेथाꣳ श्रोत्राय। श्रोत्रायात्मने। आत्मने

ऽङ्गे᳚भ्यः। अङ्गे᳚भ्य॒ आयु॑षे। आयु॑षे वी॒र्या॑य। वी॒र्या॑य॒ विष्णोः᳚। विष्णो॒रिन्द्र॑स्य। इन्द्र॑स्य॒ विश्वे॑षाम्। विश्वे॑षाम् दे॒वाना᳚म्। दे॒वाना᳚म् ज॒ठर᳚म्। ज॒ठर॑मसि। अ॒सि॒ व॒र्चो॒दाः। व॒र्चो॒दा मे᳚। व॒र्चो॒दा इति॑ वर्चः—दाः। मे॒ वर्च॑से। वर्च॑से पवस्व। प॒व॒स्व॒ कः। को॑ ऽसि। अ॒सि॒ कः। को नाम॑। नाम॒ कस्मै᳚। कस्मै᳚ त्वा। त्वा॒ काय॑। काय॑ त्वा। त्वा॒ यम्। यम् त्वा᳚। त्वा॒ सोमे॑न। सोमे॒नाती॑तृपम्। अती॑तृपय्ँ॒यम्। यम् त्वा᳚। त्वा॒ सोमे॑न। सोमे॒नामी॑मदम्। अमी॑मदꣳ सु॒प्रजाः। सु॒प्रजाः प्र॒जया᳚। सु॒प्रजा इति॑ सु—प्रजाः। प्र॒जया॑ भूयासम्। प्र॒जयेति॑ प्र—जया᳚। भू॒या॒सꣳ॒ सु॒वीरः॑। सु॒वीरो॑ वी॒रैः। सु॒वीर॒ इति॑ सु—वीरः॑। वी॒रैः सु॒वर्चाः᳚। सु॒व॒र्चा॒ वर्च॑सा। सु॒व॒र्चा॒ इति॑ सु—वर्चाः᳚। वर्च॑सा सु॒पोषः॑। सु॒पोषः॒ पोषैः᳚। सु॒पो॒ष॒ इति॑ सु—पोषः॑। पोषै॒र् विश्वे᳚भ्यः। विश्वे᳚भ्यो मे। मे॒ रू॒पेभ्यः॑। रू॒पेभ्यो॑ व॒र्चो॒दाः। व॒र्चो॒दा वर्च॑से। व॒र्चो॒दा इति॑ वर्चः—दाः। ॥ [८] ॥ वर्च॑से पवस्व। प॒व॒स्व॒ तस्य॑। तस्य॑ मे। मे॒ रा॒स्व॒। रा॒स्व॒ तस्य॑। तस्य॑ ते। ते॒ भ॒क्षी॒य॒। भ॒क्षी॒य॒ तस्य॑। तस्य॑ ते। त॒ इ॒दम्। इ॒दमुत्। उन् मृ॑जे। मृ॒ज॒ इति॑ मृजे॥ बु॒भू॒षन्न॑व। अवे᳚क्षेत। ई॒क्षे॒तै॒षः। ए॒ष वै। वै पा॑त्रि॒यः। पा॒त्रि॒यः प्र॒जाप॑तिः। प्र॒जाप॑तिर् य॒ज्ञः। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। य॒ज्ञः प्र॒जाप॑तिः। प्र॒जा-प॑ति॒स्तम्। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। त॒मे॒व। ए॒व त॑र्पयति। त॒र्प॒य॒ति॒ सः। स ए॑नम्। ए॒न॒म् तृ॒प्तः। तृ॒प्तो भू॒त्वा᳚। भू॒त्वा॒ ऽभि। अ॒भि प॑वते। प॒व॒ते॒ ब्र॒ह्म॒व॒र्च॒सका॑मः। ब्र॒ह्म॒व॒र्च॒सका॒मो ऽव॑। ब्र॒ह्म॒व॒र्च॒सका॑म॒ इति॑ ब्रह्मवर्चस—का॒मः। अवे᳚क्षेत। ई॒क्षे॒तै॒षः। ए॒ष वै। वै पा॑त्रि॒यः। पा॒त्रि॒यः प्र॒जाप॑तिः। प्र॒जाप॑तिर् य॒ज्ञः। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। य॒ज्ञः प्र॒जाप॑तिः। प्र॒जाप॑ति॒स्तम्। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। त॒मे॒व। ए॒व त॑र्पयति। त॒र्प॒य॒ति॒ सः। स ए॑नम्। ए॒न॒म् तृ॒प्तः। तृ॒प्तो ब्र॑ह्मवर्च॒सेन॑। ब्र॒ह्म॒व॒र्च॒सेना॒भि। ब्र॒ह्म॒व॒र्च॒सेनेति॑ ब्रह्म—व॒र्च॒सेन॑। अ॒भि प॑वते। प॒व॒त॒ आ॒म॒या॒वी। आ॒म॒या॒व्यव॑। ॥ [९] ॥ अवे᳚क्षेत। ई॒क्षे॒तै॒षः। ए॒ष वै। वै पा॑त्रि॒यः। पा॒त्रि॒यः प्र॒जाप॑तिः। प्र॒जाप॑तिर् य॒ज्ञः। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। य॒ज्ञः प्र॒जाप॑तिः। प्र॒जाप॑ति॒स्तम्। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। त॒मे॒व। ए॒व त॑र्पयति। त॒र्प॒य॒ति॒ सः। स ए॑नम्। ए॒न॒म् तृ॒प्तः। तृ॒प्त आयु॑षा। आयु॑षा ऽभि। अ॒भि प॑वते। प॒व॒ते॒ ऽभि॒चर॑न्न्। अ॒भि॒चर॒न्नव॑। अ॒भि॒चर॒न्नित्य॑भि—चर॑न्न्। अवे᳚क्षेत। ई॒क्षे॒तै॒षः। ए॒ष वै। वै पा॑त्रि॒यः। पा॒त्रि॒यः प्र॒जाप॑तिः। प्र॒जाप॑तिर् य॒ज्ञः। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। य॒ज्ञः प्र॒जाप॑तिः। प्र॒जाप॑ति॒स्तम्। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। त॒मे॒व। ए॒व त॑र्पयति।

तर्पयति सः। स एनम्। एनम् तृप्तः। तृप्तः प्राणापानाभ्याम्। प्राणापानाभ्याँव्वाचः। प्राणापानाभ्यामिति प्राण—अपानाभ्याम्। वाचो दख्षक्रतुभ्याम्। दख्षक्रतुभ्याम् चख्षुर्भ्याम्। दख्षक्रतुभ्यामिति दख्षक्रतु—भ्याम्। चख्षुर्भ्याꣳ श्रोत्राभ्याम्। चख्षुर्भ्यामिति चख्षुः—भ्याम्। श्रोत्राभ्यामात्मनः। आत्मनो ऽङ्गेभ्यः। अङ्गेभ्य आयुषः। आयुषो ऽन्तः। अन्तरेति। एति ताजक्। ताजक् प्र। प्र धन्वति। धन्वतीति धन्वति॥ ॥ [१०] ॥

(वाचे रूपेभ्यो वर्चोदा आमयावी पञ्चचत्वारिꣳशच्च) ॥ ३ ॥

स्फ्यः स्वस्तिः। स्वस्तिर् विघनः। विघनः स्वस्तिः। विघन इति वि—घनः। स्वस्तिः परशुः। परशुर् वेदिः। वेदिः परशुः। परशुर् नः। नः स्वस्तिः। स्वस्तिरिति स्वस्तिः॥ यज्ञिया यज्ञकृतः। यज्ञकृतः स्थ। यज्ञकृत इति यज्ञ—कृतः। स्थ ते। ते मा। मा ऽस्मिन्न्। अस्मिन्यज्ञे। यज्ञ उप। उप ह्वयद्ध्वम्। ह्वयद्ध्वमुप। उप मा। मा द्यावापृथिवी। द्यावापृथिवी ह्वयेताम्। द्यावापृथिवी इति द्यावा—पृथिवी। ह्वयेतामुप। उपास्तावः। आस्तावः कलशः। आस्ताव इत्या—स्तावः। कलशः सोमः। सोमो अग्निः। अग्निरुप। उप देवाः। देवा उप। उप यज्ञः। यज्ञ उप। उप मा। मा होत्राः। होत्रा उपहवे। उपहवे ह्वयन्ताम्। उपहव इत्युप—हवे। ह्वयन्ताम् नमः। नमो ऽग्नये। अग्नये मखघ्ने। मखघ्ने मखस्य। मखघ्न इति मख—घ्ने। मखस्य मा। मा यशः। यशो ऽर्यात्। अर्यादिति। इत्याहवनीयम्। आहवनीयमुप। आहवनीयमित्या—हवनीयम्। उप तिष्ठते। तिष्ठते यज्ञः। यज्ञो वै। वै मखः। मखो यज्ञम्। ॥ [११] ॥ यज्ञँव्वाव। वाव सः। स तत्। तदहन्न्। अहन् तस्मै। तस्मा एव। एव नमस्कृत्य। नमस्कृत्य सदः। नमस्कृत्येति नमः—कृत्य। सदः प्र। प्र सर्पति। सर्पत्यात्मनः। आत्मनो ऽनार्त्यै। अनार्त्यै नमः। नमो रुद्राय। रुद्राय मखघ्ने। मखघ्ने नमस्कृत्या। मखघ्न इति मख—घ्ने। नमस्कृत्या मा। नमस्कृत्येति नमः—कृत्या। मा पाहि। पाहीति। इत्याग्नीध्रम्। आग्नीध्रम् तस्मै। आग्नीध्रमित्याग्नि—इध्रम्। तस्मा एव। एव नमस्कृत्य। नमस्कृत्य सदः। नमस्कृत्येति नमः—कृत्य। सदः प्र। प्र सर्पति। सर्पत्यात्मनः। आत्मनो ऽनार्त्यै। अनार्त्यै नमः। नम इन्द्राय। इन्द्राय मखघ्ने। मखघ्न इन्द्रियम्। मखघ्न इति मख—घ्ने। इन्द्रियम् मे। मे वीर्यम्। वीर्यम् मा। मा

निः। निर् वधीः। वधीरिति। इति होत्रीयम्। होत्रीयमाशिषम्। आशिषमेव। आशिषमित्या—शिषम्। एवैताम्। एतामा। आ शास्ते। शास्त इन्द्रियस्य। इन्द्रियस्य वीर्यस्य। वीर्यस्यानिर्घाताय। अनिर्घाताय याः। अनिर्घातायेत्यनिः—घाताय। या वै। वै देवताः। ॥ [१२] ॥ देवताः सदसि। सदस्यार्तिम्। आर्तिमार्पयन्ति। आर्पयन्ति यः। आर्पयन्तीत्या—अर्पयन्ति। यस्ताः। ता विद्वान्। विद्वान् प्रसर्पति। प्रसर्पति न। प्रसर्पतीति प्र—सर्पति। न सदसि। सदस्यार्तिम्। आर्तिमा। आर्च्छति। ऋच्छति नमः। नमो ऽग्नये। अग्नये मखघ्ने। मखघ्न इति। मखघ्न इति मख—घ्ने। इत्याह। आहैताः। एता वै। वै देवताः। देवताः सदसि। सदस्यार्तिम्। आर्तिमा। आ ऽर्पयन्ति। अर्पयन्ति ताः। ता यः। य एवम्। एवँविद्वान्। विद्वान् प्रसर्पति। प्रसर्पति न। प्रसर्पतीति प्र—सर्पति। न सदसि। सदस्यार्तिम्। आर्तिमा। आर्च्छति। ऋच्छति दृढे। दृढे स्थः। दृढे इति दृढे। स्थः शिथिरे। शिथिरे समीची। शिथिरे इति शिथिरे। समीची मा। समीची इति समीची। मा ऽꣳहसः। अꣳहसस्पातम्। पातꣳ सूर्यः। सूर्यो मा। मा देवः। देवो दिव्यात्। दिव्यादꣳहसः। अꣳहसस्पातु। पातु वायुः। वायुरन्तरिक्षात्। अन्तरिक्षादग्निः। ॥ [१३] ॥ अग्निः पृथिव्याः। पृथिव्या यमः। यमः पितृभ्यः। पितृभ्यः सरस्वती। पितृभ्य इति पितृ—भ्यः। सरस्वती मनुष्येभ्यः। मनुष्येभ्यो देवी। देवी द्वारौ। देवी इति देवी। द्वारौ मा। मा मा। मा सम्। सम् ताप्तम्। ताप्तम् नमः। नमः सदसे। सदसे नमः। नमः सदसः। सदसस्पतये। पतये नमः। नमः सखीनाम्। सखीनाम् पुरोगाणाम्। पुरोगाणाम् चक्षुषे। पुरोगाणामिति पुरः—गानाम्। चक्षुषे नमः। नमो दिवे। दिवे नमः। नमः पृथिव्यै। पृथिव्या अहे। अहे दैधिषव्य। दैधिषव्योत्। उदतः। अतस्तिष्ठ। तिष्ठान्यस्य। अन्यस्य सदने। सदने सीद। सीद यः। यो ऽस्मत्। अस्मत् पाकतरः। पाकतर उत्। पाकतर इति पाक—तरः। उन् निवतः। निवत उत्। निवत इति नि—वतः। उदुद्वतः। उद्वतश्च। उद्वत इत्युत्—वतः। च गेषम्। गेषम् पातम्। पातम् मा। मा द्यावापृथिवी। द्यावापृथिवी अद्य। द्यावापृथिवी इति द्यावा—पृथिवी। अद्याह्नः। अह्नः सदः। सदो वै। वै प्रसर्पन्तम्। प्रसर्पन्तम् पितरः। प्रसर्पन्तमिति प्र—सर्पन्तम्। ॥ [१४] ॥ पितरो ऽनु। अनु प्र। प्र सर्पन्ति। सर्पन्ति ते। त एनम्। एनमीश्वराः। ईश्वरा हिꣳसितोः। हिꣳसितोः सदः। सदः प्रसृप्य। प्रसृप्य दक्षिणादर्धम्।

प्रसृप्येति प्र—सृप्य। दक्षिणादर्धम् परा। दक्षिणादर्धमिति दक्षिण—अर्धम्। परेक्षेत। ईक्षेता। आ ऽगन्त। अगन्त पितरः। पितरः पितृमान्। पितृमानहम्। पितृमानिति पितृ—मान्। अहयुँष्माभिः। युष्माभिर् भूयासम्। भूयासꣳ सुप्रजसः। सुप्रजसो मया। सुप्रजस इति सु—प्रजसः। मया यूयम्। यूयम् भूयास्त। भूयास्तेति। इति तेभ्यः। तेभ्य एव। एव नमस्कृत्य। नमस्कृत्य सदः। नमस्कृत्येति नमः—कृत्य। सदः प्र। प्र सर्पति। सर्पत्यात्मनः। आत्मनो ऽनार्त्यै। अनार्त्या इत्यनार्त्यै॥ ॥ [१५] ॥

(मखो वा अन्तरिक्षात् प्रसर्पन्तं त्रयस्त्रिꣳशच्च) ॥ ४ ॥

---

भक्षा। एहि। इहि मा। मा। आ विश। विश दीर्घायुत्वाय। दीर्घायुत्वाय शन्तनुत्वाय। दीर्घायुत्वायेति दीर्घायु—त्वाय। शन्तनुत्वाय रायः। शन्तनुत्वायेति शन्तनु—त्वाय। रायस्पोषाय। पोषाय वर्चसे। वर्चसे सुप्रजास्त्वाय। सुप्रजास्त्वाया। सुप्रजास्त्वायेति सुप्रजाः—त्वाय। एहि। इहि वसो। वसो पुरोवसो। वसो इति वसो। पुरोवसो प्रियः। पुरोवसो इति पुरः—वसो। प्रियो मे। मे हृदः। हृदो ऽसि। अस्यश्विनोः। अश्विनोस्त्वा। त्वा बाहुभ्याम्। बाहुभ्याꣳ सघ्यासम्। बाहुभ्यामिति बाहु—भ्याम्। सघ्यासम् नृचक्षसम्। नृचक्षसम् त्वा। नृचक्षसमिति नृ—चक्षसम्। त्वा देव। देव सोम। सोम सुचक्षाः। सुचक्षा अव। सुचक्षा इति सु—चक्षाः। अव ख्येषम्। ख्येषम् मन्द्रा। मन्द्रा ऽभिभूतिः। अभिभूतिः केतुः। अभिभूतिरित्यभि—भूतिः। केतुर् यज्ञानाम्। यज्ञानाँव्वाक्। वाग् जुषाणा। जुषाणा सोमस्य। सोमस्य तृप्यतु। तृप्यतु मन्द्रा। मन्द्रा स्वर्वाची। स्वर्वाच्यदितिः। स्वर्वाचीति सु—अर्वाची। अदितिरनाहतशीर्ष्णी। अनाहतशीर्ष्णी वाक्। अनाहतशीर्ष्णीत्यनाहत—शीर्ष्णी। वाग् जुषाणा। जुषाणा सोमस्य। सोमस्य तृप्यतु। तृप्यत्वा। एहि। इहि विश्वचर्षणे। विश्वचर्षणे शम्भूः। विश्वचर्षण इति विश्व—चर्षणे। ॥ [१६] ॥ शम्भूर् मयोभूः। शम्भूरिति शम्—भूः। मयोभूः स्वस्ति। मयोभूरिति मयः—भूः। स्वस्ति मा। मा हरिवर्ण। हरिवर्ण प्र। हरिवर्णेति हरि—वर्ण। प्र चर। चर क्रत्वे। क्रत्वे दक्षाय। दक्षाय रायः। रायस्पोषाय। पोषाय सुवीरतायै। सुवीरतायै मा। सुवीरताया इति सु—वीरतायै। मा मा। मा राजन्न्। राजन् वि।

वि बीभिषः। बीभिषो मा। मा मे। मे हार्दि। हार्दि त्विषा। त्विषा वधीः। वधीरिति वधीः॥ वृषणे शुष्माय। शुष्मायायुषे। आयुषे वर्चसे। वर्चस इति वर्चसे॥ वसुमद्गणस्य सोम। वसुमद्गणस्येति वसुमत्—गणस्य। सोम देव। देव ते। ते मतिविदः। मतिविदः प्रातस्सवनस्य। मतिविद इति मति—विदः। प्रातस्सवनस्य गायत्रछन्दसः। प्रातस्सवनस्येति प्रातः—सवनस्य। गायत्रछन्दस इन्द्रपीतस्य। गायत्रछन्दस इति गायत्र—छन्दसः। इन्द्रपीतस्य नराशꣳसपीतस्य। इन्द्रपीतस्येतीन्द्र—पीतस्य। नराशꣳसपीतस्य पितृपीतस्य। नराशꣳसपीतस्येति नराशꣳस—पीतस्य। पितृपीतस्य मधुमतः। पितृपीतस्येति पितृ—पीतस्य। मधुमत उपहूतस्य। मधुमत इति मधु—मतः। उपहूतस्योपहूतः। उपहूतस्येत्युप—हूतस्य। उपहूतो भख्षयामि। उपहूत इत्युप—हूतः। भख्षयामि रुद्रवद्गणस्य। रुद्रवद्गणस्य सोम। रुद्रवद्गणस्येति रुद्रवत्—गणस्य। सोम देव। देव ते। ते मतिविदः। मतिविदो माद्ध्यन्दिनस्य। मतिविद इति मति—विदः। माद्ध्यन्दिनस्य सवनस्य। सवनस्य त्रिष्टुप्छन्दसः। त्रिष्टुप्छन्दस इन्द्रपीतस्य। त्रिष्टुप्छन्दस इति त्रिष्टुप्—छन्दसः। इन्द्रपीतस्य नराशꣳसपीतस्य। इन्द्रपीतस्येतीन्द्र—पीतस्य। नराशꣳसपीतस्य पितृपीतस्य। नराशꣳसपीतस्येति नराशꣳस—पीतस्य।
॥ [१७] ॥ पितृपीतस्य मधुमतः। पितृपीतस्येति पितृ—पीतस्य। मधुमत उपहूतस्य। मधुमत इति मधु—मतः। उपहूतस्योपहूतः। उपहूतस्येत्युप—हूतस्य। उपहूतो भख्षयामि। उपहूत इत्युप—हूतः। भख्षयाम्यादित्यवद्गणस्य। आदित्यवद्गणस्य सोम। आदित्यवद्गणस्येत्यादित्यवत्—गणस्य। सोम देव। देव ते। ते मतिविदः। मतिविदस्तृतीयस्य। मतिविद इति मति—विदः। तृतीयस्य सवनस्य। सवनस्य जगतीछन्दसः। जगतीछन्दस इन्द्रपीतस्य। जगतीछन्दस इति जगती—छन्दसः। इन्द्रपीतस्य नराशꣳसपीतस्य। इन्द्रपीतस्येतीन्द्र—पीतस्य। नराशꣳसपीतस्य पितृपीतस्य। नराशꣳसपीतस्येति नराशꣳस—पीतस्य। पितृपीतस्य मधुमतः। पितृपीतस्येति पितृ—पीतस्य। मधुमत उपहूतस्य। मधुमत इति मधु—मतः। उपहूतस्योपहूतः। उपहूतस्येत्युप—हूतस्य। उपहूतो भख्षयामि। उपहूत इत्युप—हूतः। भख्षयामीति भख्षयामि॥ आ प्यायस्व। प्यायस्व सम्। समेतु। एतु ते। ते विश्वतः। विश्वतः सोम। सोम वृष्णियम्। वृष्णियमिति वृष्णियम्॥ भवा वाजस्य। वाजस्य सङ्गथे। सङ्गथ इति

सङ्गथे॥ हिन्व मे। मे गात्रा। गात्रा हरिवः। हरिवो गणान्। हरिव इति हरि—वः। गणान् मे।
मे मा। मा वि। वि तीतृषः। तीतृष इति तीतृषः॥ शिवो मे। मे सप्तर्षीन्। सप्तर्षीनुप। सप्तर्षी-
निति सप्त—ऋषीन्। उप तिष्ठस्व। तिष्ठस्व मा। मा मे। मे ऽवाङ्। अवाङ् नाभिम्। नाभिमति।
अति गाः। ॥ [१८] ॥ गा इति गाः॥ अपाम सोमम्। सोमममृताः। अमृता अभूम। अभूमा-
दर्श्म। अदर्श्म ज्योतिः। ज्योतिरविदाम। अविदाम देवान्। देवानिति देवान्॥ किमस्मान्।
अस्मान् कृणवत्। कृणवदरातिः। अरातिः किम्। किमु। उ धूर्तिः। धूर्तिरमृत। अमृत मर्त्यस्य।
मर्त्यस्येति मर्त्यस्य॥ यन् मे। म आत्मनः। आत्मनो मिन्दा। मिन्दा ऽभूत्। अभूदग्निः।
अग्निस्तत्। तत् पुनः। पुनरा। आ ऽहाः। अहार् जातवेदाः। जातवेदा विचर्षणिः। जात-
वेदा इति जात—वेदाः। विचर्षणिरिति वि—चर्षणिः॥ पुनरग्निः। अग्निश्चख्षुः। चख्षुरदात्।
अदात् पुनः। पुनरिन्द्रः। इन्द्रो बृहस्पतिः। बृहस्पतिरिति बृहस्पतिः॥ पुनर् मे। मे अश्विना।
अश्विना युवम्। युवम् चख्षुः। चख्षुरा। आ धत्तम्। धत्तमख्ष्योः। अख्ष्योरित्यख्ष्योः॥
इष्टयजुषस्ते। इष्टयजुष इतीष्ट—यजुषः। ते देव। देव सोम। सोम स्तुतस्तोमस्य। स्तुतस्तो-
मस्य शस्तोक्थस्य। स्तुतस्तोमस्येति स्तुत—स्तोमस्य। ॥ [१९] ॥ शस्तोक्थस्य हरिवतः।
शस्तोक्थस्येति शस्त—उक्थस्य। हरिवत इन्द्रपीतस्य। हरिवत इति हरि—वतः। इन्द्रपीतस्य
मधुमतः। इन्द्रपीतस्येतीन्द्र—पीतस्य। मधुमत उपहूतस्य। मधुमत इति मधु—मतः। उपहू-
तस्योपहूतः। उपहूतस्येत्युप—हूतस्य। उपहूतो भख्षयामि। उपहूत इत्युप—हूतः। भख्षया-
मीति भख्षयामि॥ आपूर्याः स्थ। आपूर्या इत्या—पूर्याः। स्था। आ मा। मा पूरयत। पूरयत
प्रजया। प्रजया च। प्रजयेति प्र—जया। च धनेन। धनेन च। चेति च॥ एतत् ते। ते तत।
तत ये। ये च। च त्वाम्। त्वामनु। अन्वेतत्। एतत् ते। ते पितामह। पितामह प्रपितामह।
प्रपितामह ये। प्रपितामहेति प्र—पितामह। ये च। च त्वाम्। त्वामनु। अन्वत्र। अत्र पितरः।
पितरो यथाभागम्। यथाभागम् मन्दद्ध्वम्। यथाभागमिति यथा—भागम्। मन्दद्ध्वम् नमः।
नमो वः। वः पितरः। पितरो रसाय। रसाय नमः। नमो वः। वः पितरः। पितरः शुष्माय।
शुष्माय नमः। नमो वः। वः पितरः। पितरो जीवाय। जीवाय नमः। नमो वः। वः पितरः।
पितरः स्वधायै। ॥ [२०] ॥ स्वधायै नमः। स्वधाया इति स्व—धायै। नमो वः। वः पितरः।

पितरो मन्यवे। मन्यवे नमः। नमो वः। वः पितरः। पितरो घोराय। घोराय पितरः। पितरो नमः। नमो वः। वो ये। य एतस्मिन्न्। एतस्मिँल्लोके। लोके स्थ। स्थ युष्मान्। युष्माꣳस्ते। ते ऽनु। अनु ये। ये ऽस्मिन्न्। अस्मिँल्लोके। लोके माम्। माम् ते। ते ऽनु। अनु ये। य एतस्मिन्न्। एतस्मिँल्लोके। लोके स्थ। स्थ यूयम्। यूयम् तेषाम्। तेषाँव्वसिष्ठाः। वसिष्ठा भूयास्त। भूयास्त ये। ये ऽस्मिन्न्। अस्मिँल्लोके। लोके ऽहम्। अहम् तेषाम्। तेषाँव्वसिष्ठः। वसिष्ठो भूयासम्। भूयासम् प्रजापते। प्रजापते न। प्रजापत इति प्रजा—पते। न त्वत्। त्वदेतानि। एतान्यन्यः। अन्यो विश्वा। विश्वा जातानि। जातानि परि। परि ता। ता बभूव। बभूवेति बभूव॥ ॥ [२१] ॥

यत्कामास्ते। यत्कामा इति यत्—कामाः। ते जुहुमः। जुहुम स्तत्। तन् नः। नो अस्तु। अस्तु वयम्। वयꣳ स्याम। स्याम पतयः। पतयो रयीणाम्। रयीणामिति रयीणाम्॥ देवकृतस्यैनसः। देवकृतस्येति देव—कृतस्य। एनसो ऽवयजनम्। अवयजनमसि। अवयजनमित्यव—यजनम्। असि मनुष्यकृतस्य। मनुष्यकृतस्यैनसः। मनुष्यकृतस्येति मनुष्य—कृतस्य। एनसो ऽवयजनम्। अवयजनमसि। अवयजनमित्यव—यजनम्। असि पितृकृतस्य। पितृकृतस्यैनसः। पितृकृतस्येति पितृ—कृतस्य। एनसो ऽवयजनम्। अवयजनमसि। अवयजनमित्यव—यजनम्। अस्यप्सु। अप्सु धौतस्य। अप्स्वित्यप्—सु। धौतस्य सोम। सोम देव। देव ते। ते नृभिः। नृभिः सुतस्य। नृभिरिति नृ—भिः। सुतस्येष्टयजुषः। इष्टयजुषः स्तुतस्तोमस्य। इष्टयजुष इतीष्ट—यजुषः। स्तुतस्तोमस्य शस्तोक्थस्य। स्तुतस्तोमस्येति स्तुत—स्तोमस्य। शस्तोक्थस्य यः। शस्तोक्थस्येति शस्त—उक्थस्य। यो भक्षः। भक्षो अश्वसनिः। अश्वसनिर् यः। अश्वसनिरित्यश्व—सनिः। यो गोसनिः। गोसनिस्तस्य। गोसनिरिति गो—सनिः। तस्य ते। ते पितृभिः। पितृभिर् भक्षङ्कृतस्य। पितृभिरिति पितृ—भिः। भक्षङ्कृत,स्योपहूतस्य। भक्षङ्कृतस्येति भक्षम्—कृतस्य। उपहूतस्योपहूतः। उपहूतस्येत्युप—हूतस्य। उपहूतो भक्षयामि। उपहूत इत्युप—हूतः। भक्षयामीति भक्षयामि॥ ॥ [२२] ॥

(विश्वचर्षणे त्रिष्टुप्छन्दस इन्द्रपीतस्य नराशꣳस पीतस्या ऽति स्तुतस्तोमस्य जीवाय नमो वः पितरो बभूव चतुश्चत्वारिꣳशच्च) ॥ ५ ॥

महीनाम् पयः। पयो ऽसि। असि विश्वेषाम्। विश्वेषाम् देवानाम्। देवानाम् तनूः। तनू-रृद्ध्यासम्। ऋद्ध्यासमद्य। अद्य पृषतीनाम्। पृषतीनाम् ग्रहम्। ग्रहम् पृषतीनाम्। पृष-तीनाम् ग्रहः। ग्रहो ऽसि। असि विष्णोः। विष्णोर्हृदयम्। हृदयमसि। अस्येकम्। एक-मिष। इष विष्णुः। विष्णुस्त्वा। त्वा ऽनु। अनु वि। वि चक्रमे। चक्रमे भूतिः। भूतिर् दद्ध्रा। दद्ध्रा घृतेन। घृतेन वर्द्धताम्। वर्द्धताम् तस्य। तस्य मा। मेष्टस्य। इष्टस्य वीतस्य। वीतस्य द्रविणम्। द्रविणमा। आ गम्यात्। गम्याज् ज्योतिः। ज्योतिरसि। असि वैश्वानरम्। वैश्वानरम् पृश्निय़ै। पृश्निय़ै दुग्धम्। दुग्धय्ँयावती। यावती द्यावापृथिवी। यावती इति यावती। द्यावा-पृथिवी महित्वा। द्यावापृथिवी इति द्यावा—पृथिवी। महित्वा यावत्। महित्वेति महि—त्वा। यावच् च। च सप्त। सप्त सिन्धवः। सिन्धवो वितस्थुः। वितस्थुरिति वि—तस्थुः॥ तावन्त-मिन्द्र। इन्द्र ते। ते ग्रहम्। ॥ [२३] ॥ ग्रहꣳ सह। सहोर्जा। ऊर्जा गृह्णामि। गृह्णाम्यस्तृतम्। अस्तृतमित्यस्तृतम्॥ यत् कृष्णशकुनः। कृष्णशकुनः पृषदाज्यम्। कृष्णशकुन इति कृष्ण—शकुनः। पृषदाज्य,मवमृशेत्। पृषदाज्यमिति पृषत्—आज्यम्। अवमृशेच्छूद्राः। अवमृशेदि-त्यव—मृशेत्। शूद्रा अस्य। अस्य प्रमायुकाः। प्रमायुकाः स्युः। प्रमायुका इति प्र—मायुकाः। स्युर् यत्। यच्छ्वा। श्वा ऽवमृशेत्। अवमृशेच् चतुष्पादः। अवमृशेदित्यव—मृशेत्। चतुष्पादो ऽस्य। चतुष्पाद इति चतुः—पादः। अस्य पशवः। पशवः प्रमायुकाः। प्रमायुकाः स्युः। प्रमा-युका इति प्र—मायुकाः। स्युर् यत्। यथ् स्कन्देत्। स्कन्देद् यजमानः। यजमानः प्रमायुकः। प्रमायुकः स्यात्। प्रमायुक इति प्र—मायुकः। स्यात् पशवः। पशवो वै। वै पृषदाज्यम्। पृष-दाज्यम् पशवः। पृषदाज्यमिति पृषत्—आज्यम्। पशवो वै। वा एतस्य। एतस्य स्कन्दन्ति। स्कन्दन्ति यस्य। यस्य पृषदाज्यम्। पृषदाज्यꣳ स्कन्दति। पृषदाज्यमिति पृषत्—आज्यम्। स्कन्दति यत्। यत् पृषदाज्यम्। पृषदाज्यम् पुनः। पृषदाज्यमिति पृषत्—आज्यम्। पुनर् गृह्णाति। गृह्णाति पशून्। पशूनेव। एवास्मै। अस्मै पुनः। पुनर् गृह्णाति। गृह्णाति प्राणः। प्राणो वै। प्राण इति प्र—अनः। वै पृषदाज्यम्। पृषदाज्यम् प्राणः। पृषदाज्यमिति पृषत्—आज्यम्। प्राणो वै। प्राण इति प्र—अनः। वा एतस्य। ॥ [२४] ॥ एतस्य स्कन्दति। स्कन्दति यस्य। यस्य पृषदाज्यम्। पृषदाज्यꣳ स्कन्दति। पृषदाज्यमिति पृषत्—आज्यम्। स्कन्दति यत्। यत्

पृषदाज्यम्। पृषदाज्यम् पुनः। पृषदाज्यमिति पृषत्—आज्यम्। पुनर् गृह्णाति। गृह्णाति प्राणम्। प्राणमेव। प्राणमिति प्र—अनम्। एवास्मै। अस्मै पुनः। पुनर् गृह्णाति। गृह्णाति हिरण्यम्। हिरण्यमवधाय। अवधाय गृह्णाति। अवधायेत्यव—धाय। गृह्णात्यमृतम्। अमृतवैं। वै हिरण्यम्। हिरण्यम् प्राणः। प्राणः पृषदाज्यम्। प्राण इति प्र—अनः। पृषदाज्यममृतम्। पृषदाज्यमिति पृषत्—आज्यम्। अमृतमेव। एवास्य। अस्य प्राणे। प्राणे दधाति। प्राण इति प्र—अने। दधाति शतमानम्। शतमानम् भवति। शतमानमिति शत—मानम्। भवति शतायुः। शतायुः पुरुषः। शतायुरिति शत—आयुः। पुरुषः शतेन्द्रियः। शतेन्द्रिय आयुषि। शतेन्द्रिय इति शत—इन्द्रियः। आयुष्येव। एवेन्द्रिये। इन्द्रिये प्रति। प्रति तिष्ठति। तिष्ठत्यश्वम्। अश्वमव। अव घ्रापयति। घ्रापयति प्राजापत्यः। प्राजापत्यो वै। प्राजापत्य इति प्राजा—पत्यः। वा अश्वः। अश्वः प्राजापत्यः। प्राजापत्यः प्राणः। प्राजापत्य इति प्राजा—पत्यः। प्राणः स्वात्। प्राण इति प्र—अनः। स्वादेव। एवास्मै। अस्मै योनेः। योनेः प्राणम्। प्राणम् निः। प्राणमिति प्र—अनम्। निर् मिमीते। मिमीते वि। वि वै। वा एतस्य। एतस्य यज्ञः। यज्ञ श्छिद्यते। छिद्यते यस्य। यस्य पृषदाज्यम्। पृषदाज्यꣳ स्कन्दति। पृषदाज्यमिति पृषत्—आज्यम्। स्कन्दति वैष्णव्या। वैष्णव्यर्चा। ऋचा पुनः। पुनर् गृह्णाति। गृह्णाति यज्ञः। यज्ञो वै। वै विष्णुः। विष्णुर् यज्ञेन। यज्ञेनैव। एव यज्ञम्। यज्ञꣳ सम्। सम् तनोति। तनोतीति तनोति॥ ॥ [२५] ॥

(ते पृषदाज्यं प्राणो वै योनेः प्राणं द्वाविꣳशतिश्च) ॥ ६ ॥

देव सवितः। सवितरेतत्। एतत् ते। ते प्र। प्राह। आह तत्। तत् प्र। प्र च। च सुव। सुव प्र। प्र च। च यज। यज बृहस्पतिः। बृहस्पतिर् ब्रह्मा। ब्रह्मा ऽऽयुष्मत्याः। आयुष्मत्या ऋचः। ऋचो मा। मा गात। गात तनूपात्। तनूपाथ् साम्नः। तनूपादिति तनू—पात्। साम्नः सत्याः। सत्या वः। व आशिषः। आशिषः सन्तु। आशिष इत्या—शिषः। सन्तु सत्याः। सत्या आकूतयः। आकूतय ऋतम्। आकूतय इत्या—कूतयः। ऋतम् च। च सत्यम्। सत्यम् च। च वदत। वदत स्तुत। स्तुत देवस्य। देवस्य सवितुः। सवितुः प्रसवे। प्रसवे स्तुतस्य। प्रसव इति प्र—सवे। स्तुतस्य स्तुतम्। स्तुतमसि। अस्यूर्जम्। ऊर्जम् मह्यम्। मह्यꣳ स्तुतम्।

स्तुतम् दुहाम्। दुहामा। आ मा। मा स्तुतस्य। स्तुतस्य स्तुतम्। स्तुतम् गम्यात्। गम्याच्छस्त्रस्य। शस्त्रस्य शस्त्रम्। शस्त्रमसि। ॥ [२६] ॥ अस्यूर्जम्। ऊर्जम् मह्यम्। मह्यꣳ शस्त्रम्। शस्त्रम् दुहाम्। दुहामा। आ मा। मा शस्त्रस्य। शस्त्रस्य शस्त्रम्। शस्त्रम् गम्यात्। गम्यादिन्द्रियावन्तः। इन्द्रियावन्तो वनामहे। इन्द्रियावन्त इतीन्द्रिय—वन्तः। वनामहे धुक्षीमहि। धुक्षीमहि प्रजाम्। प्रजामिषम्। प्रजामिति प्र—जाम्। इषमितीषम्॥ सा मे। मे सत्या। सत्याऽऽशीः। आशीर् देवेषु। आशीरित्या—शीः। देवेषु भूयात्। भूयाद् ब्रह्मवर्चसम्। ब्रह्मवर्चसम् मा। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। मा। आ गम्यात्। गम्यादिति गम्यात्॥ यज्ञो बभूव। बभूव सः। स आ। आ बभूव। बभूव सः। स प्र। प्र जज्ञे। जज्ञे सः। स वावृधे। वावृध इति वावृधे॥ स देवानाम्। देवानामधिपतिः। अधिपतिर् बभूव। अधिपतिरित्यधि—पतिः। बभूव सः। सो अस्मान्। अस्माꣳ अधिपतीन्। अधिपतीन् करोतु। अधिपतीनित्यधि—पतीन्। करोतु वयम्। वयꣳ स्याम। स्याम पतयः। पतयो रयीणाम्। रयीणामिति रयीणाम्॥ यज्ञो वा। वा वै। वै यज्ञपतिम्। ॥ [२७] ॥ यज्ञपतिम् दुहे। यज्ञपतिमिति यज्ञ—पतिम्। दुहे यज्ञपतिः। यज्ञपतिर् वा। यज्ञपतिरिति यज्ञ—पतिः। वा यज्ञम्। यज्ञम् दुहे। दुहे सः। स यः। यः स्तुतशस्त्रयोः। स्तुतशस्त्रयोर् दोहम्। स्तुतशस्त्रयोरिति स्तुत—शस्त्रयोः। दोहमविद्वान्। अविद्वान्यजते। यजते तम्। तय्ँयज्ञः। यज्ञो दुहे। दुहे सः। स इष्ट्वा। इष्ट्वा पापीयान्। पापीयान् भवति। भवति यः। य एनयोः। एनयोर् दोहम्। दोहव्ँविद्वान्। विद्वान्यजते। यजते सः। स यज्ञम्। यज्ञम् दुहे। दुहे सः। स इष्ट्वा। इष्ट्वा वसीयान्। वसीयान् भवति। भवति स्तुतस्य। स्तुतस्य स्तुतम्। स्तुतमसि। अस्यूर्जम्। ऊर्जम् मह्यम्। मह्यꣳ स्तुतम्। स्तुतम् दुहाम्। दुहामा। आ मा। मा स्तुतस्य। स्तुतस्य स्तुतम्। स्तुतम् गम्यात्। गम्याच्छस्त्रस्य। शस्त्रस्य शस्त्रम्। शस्त्रमसि। अस्यूर्जम्। ऊर्जम् मह्यम्। मह्यꣳ शस्त्रम्। शस्त्रम् दुहाम्। दुहामा। आ मा। मा शस्त्रस्य। शस्त्रस्य शस्त्रम्। शस्त्रम् गम्यात्। गम्यादिति। इत्याह। आहैषः। एष वै। वै स्तुतशस्त्रयोः। स्तुतशस्त्रयोर् दोहः। स्तुतशस्त्रयोरिति स्तुत—शस्त्रयोः। दोहस्तम्। तय्ँयः। य एवम्। एवव्ँविद्वान्। विद्वान्यजते। यजते दुहे। दुह एव। एव यज्ञम्। यज्ञमिष्ट्वा। इष्ट्वा वसीयान्। वसीयान् भवति। भवतीति भवति॥ ॥ [२८] ॥

(शस्त्रं वै शस्त्रन्दुहां द्वाविंꣳशतिश्च) ॥ ७ ॥

श्येनाय पत्वने। पत्वने स्वाहा। स्वाहा वट्। वट्थ् स्वयमभिगूर्ताय। स्वयमभिगूर्ताय नमः। स्वयमभिगूर्तायेति स्वयम्—अभिगूर्ताय। नमो विष्टम्भाय। विष्टम्भाय धर्मणे। विष्टम्भायेति वि—स्तम्भाय। धर्मणे स्वाहा। स्वाहा वट्। वट्थ् स्वयमभिगूर्ताय। स्वयमभिगूर्ताय नमः। स्वयमभिगूर्तायेति स्वयम्—अभिगूर्ताय। नमः परिधये। परिधये जनप्रथनाय। परिधय इति परि—धये। जनप्रथनाय स्वाहा। जनप्रथनायेति जन—प्रथनाय। स्वाहा वट्। वट्थ् स्वयमभिगूर्ताय। स्वयमभिगूर्ताय नमः। स्वयमभिगूर्तायेति स्वयम्—अभिगूर्ताय। नम ऊर्जे। ऊर्जे होत्राणाम्। होत्राणाꣳ स्वाहा। स्वाहा वट्। वट्थ् स्वयमभिगूर्ताय। स्वयमभिगूर्ताय नमः। स्वयमभिगूर्तायेति स्वयम्—अभिगूर्ताय। नमः पयसे। पयसे होत्राणाम्। होत्राणाꣳ स्वाहा। स्वाहा वट्। वट्थ् स्वयमभिगूर्ताय। स्वयमभिगूर्ताय नमः। स्वयमभिगूर्तायेति स्वयम्—अभिगूर्ताय। नमः प्रजापतये। प्रजापतये मनवे। प्रजापतय इति प्रजा—पतये। मनवे स्वाहा। स्वाहा वट्। वट्थ् स्वयमभिगूर्ताय। स्वयमभिगूर्ताय नमः। स्वयमभिगूर्तायेति स्वयम्—अभिगूर्ताय। नम ऋतम्। ऋतमृतपाः। ऋतपाः सुवर्वाट्। ऋतपा इत्यृत—पाः। सुवर्वाट्थ् स्वाहा। सुवर्वाडिति सुवः—वाट्। स्वाहा वट्। वट्थ् स्वयमभिगूर्ताय। स्वयमभिगूर्ताय नमः। स्वयमभिगूर्तायेति स्वयम्—अभिगूर्ताय। नम स्तृम्पन्ताम्। तृम्पताꣳ होत्राः। होत्रा मधोः। मधोर् घृतस्य। घृतस्य यज्ञपतिम्। यज्ञपतिमृषयः। यज्ञपतिमिति यज्ञ—पतिम्। ऋषय एनसा। एनसा ऽऽहुः। ॥ [२९] ॥ आहुरित्याहुः॥ प्रजा निर्भक्ताः। प्रजा इति प्र—जाः। निर्भक्ता अनुतप्यमानाः। निर्भक्ता इति निः—भक्ताः। अनुतप्यमाना मधव्यौ। अनुतप्यमाना इत्यनु—तप्यमानाः। मधव्यौ स्तोकौ। स्तोकावप। अप तौ। तौ रराध। रराधेति रराध॥ सम् नः। नस्ताभ्याम्। ताभ्याꣳ सृजतु। सृजतु विश्वकर्मा। विश्वकर्मा घोराः। विश्वकर्मेति विश्व—कर्मा। घोरा ऋषयः। ऋषयो नमः। नमो अस्तु। अस्त्वेभ्यः। एभ्य इत्येभ्यः॥ चक्षुष एषाम्। एषाम् मनसः। मनसश्च। च सन्धौ। सन्धौ बृहस्पतये। सन्धाविति सम्—धौ। बृहस्पतये महि। महि षत्। सद् द्युमत्। द्युमन् नमः। द्युमदिति द्यु—मत्। नम इति नमः॥ नमो विश्वकर्मणे। विश्व-

कर्मणे सः। विश्वकर्मण इति विश्व—कर्मणे। स उ। उ पातु। पात्वस्मान्। अस्माननन्यान्। अनन्यान्थ् सोमपान्। सोमपान् मन्यमानः। सोमपानिति सोम—पान्। मन्यमान इति मन्य-मानः॥ प्राणस्य विद्वान्। प्राणस्येति प्र—अनस्य। विद्वान्थ् समरे। समरे न। समर इति सम्—अरे। न धीरः। धीर एनः। एनश्चकृवान्। चकृवान् महि। महि बद्धः। बद्ध एषाम्। एषामि-त्येषाम्॥ तद्विश्वकर्मन्न्। विश्वकर्मन् प्र। विश्वकर्मन्निति विश्व—कर्मन्न्। ॥ [३०] ॥ प्र मुञ्च। मुञ्चा स्वस्तये। स्वस्तये ये। ये भख्षयन्तः। भख्षयन्तो न। न वसूनि। वसून्यानूहुः। आनू-हुरित्यानूहुः॥ यानग्नयः। अग्नयो ऽन्वतप्यन्त। अन्वतप्यन्त धिष्णियाः। अन्वतप्यन्तेत्यनु—अतप्यन्त। धिष्णिया इयम्। इयम् तेषाम्। तेषामवया। अवया दुरिष्ट्यै। दुरिष्ट्यै स्विष्टिम्। दुरिष्ट्या इति दुः—इष्ट्यै। स्विष्टिम् नः। स्विष्टिमिति सु—इष्टिम्। नस्ताम्। ताम् कृणोतु। कृणोतु विश्वकर्मा। विश्वकर्मेति विश्व—कर्मा॥ नमः पितृभ्यः। पितृभ्यो अभि। पितृभ्य इति पितृ—भ्यः। अभि ये। ये नः। नो अख्यन्न्। अख्यन्यज्ञकृतः। यज्ञकृतो यज्ञकामाः। यज्ञ-कृत इति यज्ञ—कृतः। यज्ञकामाः सुदेवाः। यज्ञकाम इति यज्ञ—कामाः। सुदेवा अकामाः। सुदेवा इति सु—देवाः। अकामा वः। वो दख्षिणाम्। दख्षिणाम् न। न नीनिम। नीनिम मा। मा नः। न स्तस्मात्। तस्मादेनसः। एनसः पापयिष्ट। पापयिष्टेति पापयिष्ट॥ यावन्तो वै। वै सदस्याः। सदस्यास्ते। ते सर्वे। सर्वे दख्षिण्याः। दख्षिण्या स्तेभ्यः। तेभ्यो यः। यो दख्षिणाम्। दख्षिणाम् न। न नयेत्। ॥ [३१] ॥ नयेदा। ऐभ्यः। एभ्यो वृश्च्येत। वृश्च्येत यत्। यद् वैश्वकर्मणानि। वैश्वकर्मणानि जुहोति। वैश्वकर्मणानीति वैश्व—कर्मणानि। जुहोति सदस्यान्। सदस्यानेव। एव तत्। तत् प्रीणाति। प्रीणात्यस्मे। अस्मे देवासः। अस्मे इत्यस्मे। देवासो वपुषे। वपुषे चिकित्सत। चिकित्सत यम्। यमाशिरा। आशिरा दम्पती। दम्पती वामम्। दम्पती इति दम्पती। वाममश्ञुतः। अश्ञुत इत्यश्ञुतः॥ पुमान् पुत्रः। पुत्रो जायते। जायते विन्दते। विन्दते वसु। वस्वथ। अथ विश्वे। विश्वे अरपाः। अरपा एधते। एधते गृहः। गृह इति गृहः॥ आशीर्दाया दम्पती। आशीर्दायेत्याशीः—दाया। दम्पती वामम्। दम्पती इति दम्पती। वाममश्ञुताम्। अश्ञुतामरिष्टः। अरिष्टो रायः। रायः सचताम्। सचतां समोकसा। समोकसेति सम्—ओकसा॥ य आ। आ ऽसिचत्। असिचथ् सन्दुग्धम्। सन्दुग्धम् कुम्भ्या।

सन्दुग्धमिति सम्—दुग्धम्। कुम्भ्या सह। सहेष्टेन। इष्टेन यामन्न्। यामन्नमतिम्। अमतिम् जहातु। जहातु सः। स इति सः॥ सर्पिग्रीवी पीवरी। सर्पिग्रीवीति सर्पिः—ग्रीवी। ॥ [३२] ॥
पीवर्यस्य। अस्य जाया। जाया पीवानः। पीवानः पुत्राः। पुत्रा अकृशासः। अकृशासो अस्य। अस्येत्यस्य॥ सहजानिर् यः। सहजानिरिति सह—जानिः। यः सुमखस्यमानः। सुमखस्यमान इन्द्राय। सुमखस्यमान इति सु—मखस्यमानः। इन्द्रायाशिरम्। आशिरꣳ सह। सह कुम्भ्या। कुम्भ्या ऽदात्। अदादित्यदात्॥ आशीर् मे। आशीरित्या—शीः। म ऊर्जम्। ऊर्जमुत। उत सुप्रजास्त्वम्। सुप्रजा,स्त्वमिषम्। सुप्रजास्त्वमिति सुप्रजाः—त्वम्। इषम् दधातु। दधातु द्रविणम्। द्रविणꣳ सवर्चसम्। सवर्चसमिति स—वर्चसम्॥ सञ्जयन् ख्षेत्राणि। सञ्जयन्निति सम्—जयन्न्। ख्षेत्राणि सहसा। सहसा ऽहम्। अहमिन्द्र। इन्द्र कृण्वानः। कृण्वानो अन्यान्। अन्याꣳ अधरान्। अधरान्थ् सपत्नान्। सपत्नानिति सपत्नान्॥ भूतमसि। असि भूते। भूते मा। मा धाः। धा मुखम्। मुखमसि। असि मुखम्। मुखम् भूयासम्। भूयासम् द्यावापृथिवीभ्याम्। द्यावापृथिवीभ्याम् त्वा। द्यावापृथिवीभ्यामिति द्यावा—पृथिवीभ्याम्। त्वा परि। परि गृह्णामि। गृह्णामि विश्वे। विश्वे त्वा। त्वा देवाः। देवा वैश्वानराः। वैश्वानराः प्र। ॥ [३३] ॥
प्र च्यावयन्तु। च्यावयन्तु दिवि। दिवि देवान्। देवान् दृꣳह। दृꣳहान्तरिख्षे। अन्तरिख्षे वयाꣳसि। वयाꣳसि पृथिव्याम्। पृथिव्याम् पार्थिवान्। पार्थिवान् ध्रुवम्। ध्रुवम् ध्रुवेण। ध्रुवेण हविषा। हविषा ऽव। अव सोमम्। सोमम् नयामसि। नयामसीति नयामसि॥ यथा नः। नः सर्वम्। सर्वमित्। इज् जगत्। जगदयख्ष्मम्। अयख्ष्मꣳ सुमनाः। सुमना असत्। सुमना इति सु—मनाः। असदित्यसत्॥ यथा नः। न इन्द्रः। इन्द्र इत्। इद् विशः। विशः केवलीः। केवलीः सर्वाः। सर्वाः समनसः। समनसः करत्। समनस इति स—मनसः। करदिति करत्॥ यथा नः। नः सर्वाः। सर्वा इत्। इद् दिशः। दिशो ऽस्माकम्। अस्माकम् केवलीः। केवलीरसन्न्। असन्नित्यसन्न्॥ ॥ [३४] ॥

(एनसा विश्वकर्मन् यो दख्षिणां न सर्पिग्रीवी वैश्वनरा श्चत्वारिꣳशच्च) ॥ ८ ॥

यद् वै। वै होता᳚। होता᳚ ऽद्ध्व॒र्यु॒म्। अ॒द्ध्व॒र्यु॒,म॑भ्या॒ह्वय॑ते। अ॒भ्या॒ह्वय॑ते॒ वज्र᳚म्। अ॒भ्या॒ह्वय॑त॒
इत्य॑भि—आ॒ह्वय॑ते। वज्र॑मेनम्। ए॒न॒म॒भि। अ॒भि प्र। प्र व॑र्तयति। व॒र्त॒य॒त्युक्थ॑शाः। उक्थ॑शा॒
इति॑। उक्थ॑शा॒ इत्युक्थ—शा॒ः। इत्या॑ह। आ॒ह॒ प्रा॒त॒स्स॒व॒नम्। प्रा॒त॒स्स॒व॒नम् प्र॑ति॒गीर्य॑। प्रा॒त॒-
स्स॒व॒नमिति॑ प्रातः—स॒व॒नम्। प्र॒ति॒गीर्य॒ त्रीणि॑। प्र॒ति॒गीर्यैति॑ प्रति—गीर्य॑। त्रीण्ये॒तानि॑। ए॒तान्य॒-
ख्षरा॑णि। अ॒ख्षरा॑णि त्रि॒पदा᳚। त्रि॒पदा॑ गाय॒त्री। त्रि॒पदेति॑ त्रि—पदा᳚। गा॒य॒त्री गा॑य॒त्रम्। गा॒य॒त्रम्
प्रा॑तस्सव॒नम्। प्रा॒त॒स्स॒व॒नम् गा॑यत्रि॒या। प्रा॒त॒स्स॒व॒नमिति॑ प्रातः—स॒व॒नम्। गा॒य॒त्रि॒यैव। ए॒व
प्रा॑तस्सव॒ने। प्रा॒त॒स्स॒व॒ने वज्र᳚म्। प्रा॒त॒स्स॒व॒न इति॑ प्रातः—स॒व॒ने। वज्र॑म॒न्तः। अ॒न्तर् ध॑त्ते।
ध॒त्त॒ उ॒क्थम्। उ॒क्थँव्वा॒चि। वा॒चीति॑। इत्या॑ह। आ॒ह॒ माद्ध्य॑न्दिनम्। माद्ध्य॑न्दिन॒ꣳ॒ सव॑नम्।
सव॑नम् प्रति॒गीर्य॑। प्र॒ति॒गीर्य॑ च॒त्वारि॑। प्र॒ति॒गीर्यैति॑ प्रति—गीर्य॑। च॒त्वार्ये॒तानि॑। ए॒तान्य॒ख्ष-
रा॑णि। अ॒ख्षरा॑णि॒ चतु॑ष्पदा। चतु॑ष्पदा त्रि॒ष्टुप्। चतु॑ष्प॒देति॒ चतु॑ः—प॒दा॒। त्रि॒ष्टुप् त्रैष्टु॑भम्। त्रैष्टु॑भ॒म्
माद्ध्य॑न्दिनम्। माद्ध्य॑न्दिन॒ꣳ॒ सव॑नम्। सव॑नम् त्रि॒ष्टुभा᳚। त्रि॒ष्टु॒भैव। ए॒व माद्ध्य॑न्दिने। माद्ध्य॑-
न्दि॒ने सव॑ने। सव॑ने॒ वज्र᳚म्। वज्र॑म॒न्तः। अ॒न्तर् ध॑त्ते। ध॒त्त॒ उ॒क्थम्। ॥ [३५] ॥ उ॒क्थँव्वा॒चि।
वा॒चीन्द्रा॑य। इन्द्रा॒येति॑। इत्या॑ह। आ॒ह॒ तृ॒ती॒य॒स॒व॒नम्। तृ॒ती॒य॒स॒व॒नम् प्र॑ति॒गीर्य॑। तृ॒ती॒य॒स॒व॒न-
मिति॑ तृतीय—स॒व॒नम्। प्र॒ति॒गीर्य॑ स॒प्त। प्र॒ति॒गीर्यैति॑ प्रति—गीर्य॑। स॒प्तैतानि॑। ए॒तान्य॒ख्षरा॑णि।
अ॒ख्षरा॑णि स॒प्तप॑दा। स॒प्तप॑दा॒ शक्व॑री। स॒प्त॒प॒देति॑ स॒प्त—प॒दा॒। शक्व॑री शा॒क्व॒रः। शा॒क्व॒रो वज्र॑ः।
वज्रो॒ वज्रे॑ण। वज्रे॑णै॒व। ए॒व तृ॑तीयसव॒ने। तृ॒ती॒य॒स॒व॒ने वज्र᳚म्। तृ॒ती॒य॒स॒व॒न इति॑ तृतीय—स॒व॒ने।
वज्र॑म॒न्तः। अ॒न्तर् ध॑त्ते। ध॒त्ते॒ ब्र॒ह्म॒वा॒दिन॑ः। ब्र॒ह्म॒वा॒दिनो॑ वदन्ति। ब॒ह्म॒वा॒दि॒न इति॑ ब्रह्म—
वा॒दिन॑ः। व॒द॒न्ति॒ सः। स तु। त्वै। वा अ॑द्ध्व॒र्युः। अ॒द्ध्व॒र्युः स्या᳚त्। स्या॒द् यः। यो य॑था-
स॒व॒नम्। य॒था॒स॒व॒नम् प्र॑ति॒ग॒रे। य॒था॒स॒व॒नमिति॑ यथा—स॒व॒नम्। प्र॒ति॒ग॒रे छन्दा॑ꣳसि। प्र॒ति॒ग॒र
इति॑ प्रति—ग॒रे। छन्दा॑ꣳसि सम्पा॒दये᳚त्। स॒म्पा॒द॒येत् तेज॑ः। स॒म्पा॒द॒येदिति॑ सम्—पा॒दये᳚त्।
तेज॑ः प्रातस्सव॒ने। प्रा॒त॒स्स॒व॒न आ॒त्मन्न्। प्रा॒त॒स्स॒व॒न इति॑ प्रातः—स॒व॒ने। आ॒त्मन् द॑धीत।
दधी॑तेन्द्रि॒यम्। इ॒न्द्रि॒यम् माद्ध्य॑न्दिने। माद्ध्य॑न्दि॒ने सव॑ने। सव॑ने प॒शून्। प॒शूꣳ॒ स्तृ॑तीयसव॒ने।
तृ॒ती॒य॒स॒व॒न इति॑। तृ॒ती॒य॒स॒व॒न इति॑ तृतीय—स॒व॒ने। इत्युक्थ॑शाः। उक्थ॑शा॒ इति॑। उक्थ॑शा॒
इत्युक्थ—शा॒ः। इत्या॑ह। आ॒ह॒ प्रा॒त॒स्स॒व॒नम्। प्रा॒त॒स्स॒व॒नम् प्र॑ति॒गीर्य॑। प्रा॒त॒स॒व॒नमिति॑ प्रातः—

सवनम्। प्रतिगीर्य त्रीणि। प्रतिगीर्येति प्रति—गीर्य। त्रीण्येतानि। एतान्यक्षराणि। अक्षराणि त्रिपदा। ॥ [३६] ॥ त्रिपदा गायत्री। त्रिपदेति त्रि—पदा। गायत्री गायत्रम्। गायत्रम् प्रातस्सवनम्। प्रातस्सवनम् प्रातस्सवने। प्रातस्सवनमिति प्रातः—सवनम्। प्रातस्सवन एव। प्रातस्सवन इति प्रातः—सवने। एव प्रतिगरे। प्रतिगरे छन्दाꣳसि। प्रतिगर इति प्रति—गरे। छन्दाꣳसि सम्। सम् पादयति। पादयत्यथो। अथो तेजः। अथो इत्यथो। तेजो वै। वै गायत्री। गायत्री तेजः। तेजः प्रातस्सवनम्। प्रातस्सवनम् तेजः। प्रातस्सवनमिति प्रातः—सवनम्। तेज एव। एव प्रातस्सवने। प्रातस्सवन आत्मन्न्। प्रातस्सवन इति प्रातः—सवने। आत्मन् धत्ते। धत्त उक्थम्। उक्थँव्वाचि। वाचीति। इत्याह। आह माद्ध्यन्दिनम्। माद्ध्यन्दिनꣳ सवनम्। सवनम् प्रतिगीर्य। प्रतिगीर्य चत्वारि। प्रतिगीर्येति प्रति—गीर्य। चत्वार्येतानि। एतान्यक्षराणि। अक्षराणि चतुष्पदा। चतुष्पदा त्रिष्टुप्। चतुष्पदेति चतुः—पदा। त्रिष्टुप् त्रैष्टुभम्। त्रैष्टुभम् माद्ध्यन्दिनम्। माद्ध्यन्दिनꣳ सवनम्। सवनम् माद्ध्यन्दिने। माद्ध्यन्दिन एव। एव सवने। सवने प्रतिगरे। प्रतिगरे छन्दाꣳसि। प्रतिगर इति प्रति—गरे। छन्दाꣳसि सम्। सम् पादयति। पादयत्यथो। अथो इन्द्रियम्। अथो इत्यथो। इन्द्रियँव्वै। वै त्रिष्टुक्। त्रिष्टुगिन्द्रियम्। इन्द्रियम् माद्ध्यन्दिनम्। माद्ध्यन्दिनꣳ सवनम्। सवनमिन्द्रियम्। ॥ [३७] ॥ इन्द्रियमेव। एव माद्ध्यन्दिने। माद्ध्यन्दिने सवने। सवन आत्मन्न्। आत्मन् धत्ते। धत्त उक्थम्। उक्थँव्वाचि। वाचीन्द्राय। इन्द्रायेति। इत्याह। आह तृतीयसवनम्। तृतीयसवनम् प्रतिगीर्य। तृतीयसवनमिति तृतीय—सवनम्। प्रतिगीर्य सप्त। प्रतिगीर्येति प्रति—गीर्य। सप्तैतानि। एतान्यक्षराणि। अक्षराणि सप्तपदा। सप्तपदा शक्वरी। सप्तपदेति सप्त—पदा। शक्वरी शाक्वराः। शाक्वराः पशवः। पशवो जागतम्। जागतम् तृतीयसवनम्। तृतीयसवनम् तृतीयसवने। तृतीयसवनमिति तृतीय—सवनम्। तृतीयसवन एव। तृतीयसवन इति तृतीय—सवने। एव प्रतिगरे। प्रतिगरे छन्दाꣳसि। प्रतिगर इति प्रति—गरे। छन्दाꣳसि सम्। सम् पादयति। पादयत्यथो। अथो पशवः। अथो इत्यथो। पशवो वै। वै जगती। जगती पशवः। पशव स्तृतीयसवनम्। तृतीयसवनम् पशून्। तृतीयसवनमिति तृतीय—सवनम्। पशूनेव। एव तृतीयसवने। तृतीयसवन आत्मन्न्। तृतीयसवन इति तृतीय—सवने। आत्मन् धत्ते। धत्ते यत्।

यद् वै। वै होता। होता ऽद्ध्वर्युम्। अद्ध्वर्यु,मभ्याह्वयते। अभ्याह्वयत आव्यम्। अभ्याह्वयत इत्यभि—आह्वयते। आव्यमस्मिन्न्। अस्मिन् दधाति। दधाति तत्। तद् यत्। यन् न। नापहनीत। ॥ [३८] ॥ अपहनीत पुरा। अपहनीतेत्यप—हनीत। पुरा ऽस्य। अस्य सँव्वथ्सरात्। सँव्वथ्सराद् गृहे। सँव्वथ्सरादिति सं—वथ्सरात्। गृह आ। आ वेवीरन्न्। वेवीरञ्छोꣳसा। शोꣳसा मोदः। मोद इव। इवेति। इति प्रत्याह्वयते। प्रत्याह्वयते तेन। प्रत्याह्वयत इति प्रति—आह्वयते। तेनैव। एव तत्। तदप। अप हते। हते यथा। यथा वै। वा आयताम्। आयताम् प्रतीख्षते। आयतामित्या—यताम्। प्रतीख्षत एवम्। प्रतीख्षत इति प्रति—ईख्षते। एवमद्ध्वर्युः। अद्ध्वर्युः प्रतिगरम्। प्रतिगरम् प्रति। प्रतिगरमिति प्रति—गरम्। प्रतीख्षते। ईख्षते यत्। यदभिप्रतिगृणीयात्। अभिप्रतिगृणीयाद् यथा। अभिप्रतिगृणीयादित्यभि—प्रतिगृणीयात्। यथा ऽऽयतया। आयतया समृच्छते। आयतयेत्या—यतया। समृच्छते तादृक्। समृच्छत इति सम्—ऋच्छते। तादृगेव। एव तत्। तद् यत्। यदर्द्धर्चात्। अर्द्धर्चा लुप्येत। अर्द्धर्चादित्यर्द्ध—ऋचात्। लुप्येत यथा। यथा धावद्भ्यः। धावद्भ्यो हीयते। धावद्भ्य इति धावत्—भ्यः। हीयते तादृक्। तादृगेव। एव तत्। तत् प्रबाहुक्। प्रबाहुग् वै। प्रबाहुगिति प्र—बाहुक्। वा ऋत्विजाम्। ऋत्विजामुद्गीथाः। उद्गीथा उद्गीथः। उद्गीथा इत्युत्—गीथाः। उद्गीथ एव। उद्गीथ इत्युत्—गीथः। एवोद्गातृणाम्। उद्गातृणामृचः। उद्गातृणामित्युत्—गातृणाम्। ॥ [३९] ॥ ऋचः प्रणवः। प्रणव उक्थशꣳसिनाम्। प्रणव इति प्र—नवः। उक्थशꣳसिनाम् प्रतिगरः। उक्थशꣳसिनामित्युक्थ—शꣳसिनाम्। प्रतिगरो ऽद्ध्वर्यूणाम्। प्रतिगर इति प्रति—गरः। अद्ध्वर्यूणाय्यँः। य एवम्। एवव्विँद्वान्। विद्वान् प्रतिगृणाति। प्रतिगृणात्यन्नादः। प्रतिगृणातीति प्रति—गृणाति। अन्नाद एव। अन्नाद इत्यन्न—अदः। एव भवति। भवत्या। आ ऽस्य। अस्य प्रजायाम्। प्रजायाव्वाँजी। प्रजायामिति प्र—जायाम्। वाजी जायते। जायत इयम्। इयव्वैँ। वै होता। होता ऽसौ। असावद्ध्वर्युः। अद्ध्वर्युर् यत्। यदासीनः। आसीनः शꣳसति। शꣳसत्यस्याः। अस्या एव। एव तत्। तद्धोता। होता न। नैति। एत्यास्ते। आस्त इव। इव हि। हीयम्। इयमथो। अथो इमाम्। अथो इत्यथो। इमामेव। एव तेन। तेन यजमानः। यजमानो दुहे। दुहे यत्। यत् तिष्ठन्न्। तिष्ठन् प्रतिगृणाति। प्रतिगृणा-

त्यमुष्याः। प्रतिगृणातीति प्रति—गृणाति। अमुष्या एव। एव तत्। तदद्ध्वर्युः। अद्ध्वर्युर् न। नैति। एति तिष्ठति। ॥ [४०] ॥ तिष्ठतीव। इव हि। ह्यसौ। असावथो। अथो अमूम्। अथो इत्यथो। अमूमेव। एव तेन। तेन यजमानः। यजमानो दुहे। दुहे यत्। यदासीनः। आसीनः शꣳसति। शꣳसति तस्मात्। तस्मादितःप्रदानम्। इतःप्रदानम् देवाः। इतःप्रदानमितीतः—प्रदानम्। देवा उप। उप जीवन्ति। जीवन्ति यत्। यत् तिष्ठन्न्। तिष्ठन् प्रतिगृणाति। प्रतिगृणाति तस्मात्। प्रतिगृणातीति प्रति—गृणाति। तस्मादमुतःप्रदानम्। अमुतःप्रदानम् मनुष्याः। अमुतःप्रदानमित्यमुतः—प्रदानम्। मनुष्या उप। उप जिवन्ति। जीवन्ति यत्। यत् प्राङ्। प्राङा-सीनः। आसीनः शꣳसति। शꣳसति प्रत्यङ्। प्रत्यङ् तिष्ठन्न्। तिष्ठन् प्रतिगृणाति। प्रतिगृ-णाति तस्मात्। प्रतिगृणातीति प्रति—गृणाति। तस्मात् प्राचीनम्। प्राचीनꣳ रेतः। रेतो धीयते। धीयते प्रतीचीः। प्रतीचीः प्रजाः। प्रजा जायन्ते। प्रजा इति प्र—जाः। जायन्ते यत्। यद् वै। वै होता। होता ऽद्ध्वर्युम्। अद्ध्वर्युमभ्याह्वयते। अभ्याह्वयते वज्रम्। अभ्याह्वयत इत्यभि—आह्वयते। वज्रमेनम्। एनमभि। अभि प्र। प्र वर्तयति। वर्तयति पराङ्। पराङा। आ वर्तते। वर्तते वज्रम्। वज्रमेव। एव तत्। तन् नि। नि करोति। करोतीति करोति॥ ॥ [४१] ॥

(सवने वज्रमन्तर्धत्ते त्रीण्येतान्यक्षराणी न्द्रियं माद्ध्यन्दिनꣳ सवनं नो ह्नातृणा मध्वर्युर्नैति वर्तयत्य ष्टौ च) ॥ ९ ॥

उपयामगृहीतो ऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि वाक्षसत्। वाक्ष-सदसि। वाक्षसदिति वाक्ष—सत्। असि वाक्पाभ्याम्। वाक्पाभ्याम् त्वा। वाक्पाभ्या-मिति वाक्—पाभ्याम्। त्वा क्रतुपाभ्याम्। क्रतुपाभ्यामस्य। क्रतुपाभ्यामिति क्रतु—पाभ्याम्। अस्य यज्ञस्य। यज्ञस्य ध्रुवस्य। ध्रुवस्याद्ध्यक्षाभ्याम्। अद्ध्यक्षाभ्याम् गृह्णामि। अद्ध्य-क्षाभ्यामित्यधि—अक्षाभ्याम्। गृह्णाम्युपयामगृहीतः। उपयामगृहीतो ऽसि। उपयामगृ-हीत इत्युपयाम—गृहीतः। अस्यृतसत्। ऋतसदसि। ऋतसदित्यृत—सत्। असि चक्षु-ष्पाभ्याम्। चक्षुष्पाभ्याम् त्वा। चक्षुष्पाभ्यामिति चक्षुः—पाभ्याम्। त्वा क्रतुपाभ्याम्। क्रतु-पाभ्यामस्य। क्रतुपाभ्यामिति क्रतु—पाभ्याम्। अस्य यज्ञस्य। यज्ञस्य ध्रुवस्य। ध्रुवस्याद्ध्य-क्षाभ्याम्। अद्ध्यक्षाभ्याम् गृह्णामि। अद्ध्यक्षाभ्यामित्यधि—अक्षाभ्याम्। गृह्णाम्युपयाम-

गृहीतः। उपयामगृहीतो ऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि श्रुतसत्। श्रुत-सदसि। श्रुतसदिति श्रुत—सत्। असि श्रोत्रपाभ्याम्। श्रोत्रपाभ्याम् त्वा। श्रोत्रपाभ्यामिति श्रोत्र—पाभ्याम्। त्वा क्रतुपाभ्याम्। क्रतुपाभ्यामस्य। क्रतुपाभ्यामिति क्रतु—पाभ्याम्॥ ?अस्य यज्ञस्य। यज्ञस्य ध्रुवस्य। ध्रुवस्याद्ध्यख्षाभ्याम्। अद्ध्यख्षाभ्याम् गृह्णामि। अद्ध्यख्षाभ्या-मित्यधि—अख्षाभ्याम्। गृह्णामि देवेभ्यः। देवेभ्यस्त्वा। त्वा विश्वदेवेभ्यः। विश्वदेवेभ्यस्त्वा। विश्वदेवेभ्य इति विश्व—देवेभ्यः। त्वा विश्वेभ्यः। विश्वेभ्यस्त्वा। त्वा देवेभ्यः। देवेभ्यो विष्णो। विष्णवुरुक्रम। उरुक्रमैषः। उरुक्रमेत्युरु—क्रम। एष ते। ते सोमः। सोमस्तम्। तꣳ रख्षस्व। रख्षस्व तम्। ॥ [४२] ॥ तम् ते। ते दुश्चख्षाः। दुश्चख्षा मा। दुश्चख्षा इति दुः—चख्षाः। मा ऽव। अव ख्यत्। ख्यन् मयि। मयि वसुः। वसुः पुरोवसुः। पुरोवसुर् वाक्पाः। पुरोवसुरिति पुरः—वसुः। वाक्पा वाचम्। वाक्पा इति वाक्—पाः। वाचम् मे। मे पाहि। पाहि मयि। मयि वसुः। वसुर् विदद्वसुः। विदद्वसु श्चख्षुष्पाः। विदद्वसुरिति विदत्—वसुः। चख्षुष्पा श्चख्षुः। चख्षुष्पा इति चख्षुः—पाः। चख्षुर् मे। मे पाहि। पाहि मयि। मयि वसुः। वसुः सय्ँयद्वसुः। सय्ँयद्वसुः श्रोत्रपाः। सय्ँयद्वसुरिति सय्ँयत्—वसुः। श्रोत्रपाः श्रोत्रम्। श्रोत्रपा इति श्रोत्र—पाः। श्रोत्रं मे। मे पाहि। पाहि भूः। भूरसि। असि श्रेष्ठः। श्रेष्ठो रश्मीनाम्। रश्मीनाम् प्राणपाः। प्राणपाः प्राणम्। प्राणपा इति प्राण—पाः। प्राणम् मे। प्राणमिति प्र—अनम्। मे पाहि। पाहि धूः। धूरसि। असि श्रेष्ठः। श्रेष्ठो रश्मीनाम्। रश्मिनामपानपाः। अपानपा अपानम्। अपा-नपा इत्यपान—पाः। अपानम् मे। अपानमित्यप—अनम्। मे पाहि। पाहि यः। यो नः। न इन्द्रवायू। इन्द्रवायू मित्रावरुणौ। इन्द्रवायू इतीन्द्र—वायू। मित्रावरुणावश्विनौ। मित्राव-रुणाविति मित्रा—वरुणौ। अश्विनावभिदासति। अभिदासति भ्रातृव्यः। अभिदासतीत्यभि—दासति। भ्रातृव्य उत्पिपीते। उत्पिपीते शुभः। उत्पिपीत इत्युत्—पिपीते। शुभस्पती। पती इदम्। पती इति पती। इदमहम्। अहम् तम्। तमधरम्। अधरम् पादयामि। पादयामि यथा। यथेन्द्र। इन्द्राहम्। अहमुत्तमः। उत्तमश्चेतयानि। उत्तम इत्युत्—तमः। चेतयानीति चेत-यानि॥ ॥ [४३] ॥

(रख्षस्व भ्रातृव्य स्त्रयोदश च) ॥ १० ॥

प्र सः। सो अग्ने। अग्ने तव। तवोतिभिः। ऊतिभिः सुवीराभिः। ऊतिभिरित्यूति—भिः। सुवीराभिस्तरति। सुवीराभिरिति सु—वीराभिः। तरति वाजकर्मभिः। वाजकर्मभिरिति वाज-कर्म—भिः॥ यस्य त्वम्। त्वꣳ सख्यम्। सख्यमाविथ। आविथेत्याविथ॥ प्र होत्रे। होत्रे पूर्व्यम्। पूर्व्यँव्वचः। वचो ऽग्नये। अग्नये भरत। भरता बृहत्। बृहदिति बृहत्॥ विपाम् ज्योतीꣳषि। विपामिति वि—पाम्। ज्योतीꣳषि बिभ्रते। बिभ्रते न। न वेधसे। वेधस इति वेधसे॥ अग्ने त्री। त्री ते। ते वाजिना। वाजिना त्री। त्री षधस्था। सधस्था तिस्रः। सधस्थेति सध—स्था। तिस्रस्ते। ते जिह्वाः। जिह्वा ऋतजात। ऋतजात पूर्वीः। ऋतजातेत्यृत—जात। पूर्वीरिति पूर्वीः॥ तिस्र उ। उ ते। ते तनुवः। तनुवो देववाताः। देववातास्ताभिः। देववाता इति देव—वाताः। ताभिर् नः। नः पाहि। पाहि गिरः। गिरो अप्रयुच्छन्न्। अप्रयुच्छन्नित्यप्र—युच्छन्न्॥ सँव्वाम्। वां कर्मणा। कर्मणा सम्। समिषा। इषा हिनोमि। ॥ [४४] ॥ हिनोमीन्द्राविष्णू। इन्द्राविष्णू अपसः। इन्द्राविष्णू इतीन्द्रा—विष्णू। अपसस्पारे। पारे अस्य। अस्येत्यस्य॥ जुषे-थाँय्यज्ञम्। यज्ञम् द्रविणम्। द्रविणम् च। च धत्तम्। धत्तमरिष्टैः। अरिष्टैर् नः। नः पथिभिः। पथिभिः पारयन्ता। पथिभिरिति पथि—भिः। पारयन्तेति पारयन्ता॥ उभा जिग्यथुः। जिग्यथुर् न। न परा। परा जयेथे। जयेथे न। जयेथे इति जयेथे। न परा। परा जिग्ये। जिग्ये कतरः। कतरश्चन। चनैनोः। एनोरित्येनोः॥ इन्द्रश्च। च विष्णो। विष्णो यत्। विष्णो इति विष्णो। यदपस्पृधेथाम्। अपस्पृधेथाम् त्रेधा। त्रेधा सहस्रम्। सहस्रव्वि। वि तत्। तदैरयेथाम्। ऐरये-थामित्यैरयेथाम्॥ त्रीण्यायूꣳषि। आयूꣳषि तव। तव जातवेदः। जातवेदस्तिस्रः। जातवेद इति जात—वेदः। तिस्र आजानीः। आजानीरुषसः। आजानीरित्या—जानीः। उषसस्ते। ते अग्ने। अग्न इत्यग्ने॥ ताभिर् देवानाम्। देवानामवः। अवो यक्षि। यक्षि विद्वान्। विद्वानथ। अथा भव। ॥ [४५] ॥ भव यजमानाय। यजमानाय शम्। शँय्योः। योरिति योः॥ अग्निस्त्रीणि। त्रीणि त्रिधातूनि। त्रिधातून्या। त्रिधातूनीति त्रि—धातूनि। आ क्षेति। क्षेति विदथा। विदथा कविः। कविरिति कविः॥ स त्रीन्। त्रीꣳरेकादशान्। एकादशाꣳ इह। इहेतीह॥ यक्षच्च च। च पिप्रयत्। पिप्रयच्च च। च नः। नो विप्रः। विप्रो दूतः। दूतः परिष्कृतः। परिष्कृत इति परि-

ष्कृतः॥ नभन्तामन्यके। अन्यके समे। सम इति समे॥ इन्द्राविष्णू दृꣳहिताः। इन्द्राविष्णू इतीन्द्रा—विष्णू। दृꣳहिताः शम्बरस्य। शम्बरस्य नव। नव पुरः। पुरो नवतिम्। नवतिम् च। च श्ञथिष्टम्। श्ञथिष्टमिति श्ञथिष्टम्॥ शतँव्वर्चिनः। वर्चिनः सहस्रम्। सहस्रम् च। च साकम्। साकꣳ हथः। हथो अप्रति। अप्रत्यसुरस्य। असुरस्य वीरान्। वीरानिति वीरान्॥ उत माता। माता महिषम्। महिषमनु। अन्ववेनत्। अवेनदमी। अमी त्वा। अमी इत्यमी। त्वा जहति। जहति पुत्र। पुत्र देवाः। देवा इति देवाः॥ अथाब्रवीत्। अब्रवीद् वृत्रम्। वृत्रमिन्द्रः। इन्द्रो हनिष्यन्न्। हनिष्यन्थ् सखे। सखे विष्णो। विष्णो वितरम्। विष्णो इति विष्णो। वितरँव्वि। वितरमिति वि—तरम्। वि क्रमस्व। क्रमस्वेति क्रमस्व॥ ॥ [४६] ॥

(इषा ऽथ त्वा त्रयोदश च) ॥ ११ ॥

॥ हरिः ॐ ॥

तृतीयकाण्डे द्वितीयः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ४६ |

ॐ